# શ્રીવેદાન્તદેશિકમઙ્ગલાનુશાસનમ્

shrIvedAntadeshikamangalAnushAsanam

sanskritdocuments.org

May 13, 2018

# shrIvedAntadeshikamangalAnushAsanam

# શ્રીવેદાન્તદેશિકમઙ્ગલાનુશાસનમ્

## Sanskrit Document Information

Text title : vedAntadeshikamangalAnushAsanam

File name : vedAntadeshikamangalAnushAsanam.itx

Category : deities_misc, gurudev, rAmAnujasampradAya, mangala

Location : doc_deities_misc

Proofread by : PSA Easwaran psawaswaran at gmail.com

Acknowledge-Permission: Shri Tripursundari Ved Gurukulam, Sahibabad (Ghaziabad), UP

Latest update : March 24, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 13, 2018

*sanskritdocuments.org*

# શ્રીવેદાન્તદેશિકમઙ્ગલાનુશાસનમ્

શ્રીમદ્વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥ ૧॥

શ્રીમલ્લક્ષ્મણયોગીન્દ્રસિદ્ધાન્તવિજયધ્વજમ્ ।
વિશ્વામિત્રકુલોદ્ભૂતં વરદાર્યમહં ભજે ॥ ૨॥

સર્વતન્ત્રસ્વતન્ત્રાય સિંહાય કવિવાદિનામ્ ।
વેદાન્તાચાર્યવર્યાય વેઙ્કટેશાય મઙ્ગલમ્ ॥ ૩॥

નભસ્યમાસિ શ્રોણાયામવતીર્ણાય સૂરયે ।
વિશ્વામિત્રાન્વયાયાસ્તુ વઙ્કટેશાય મઙ્ગલમ્ ॥ ૪॥

પિતા યસ્યાનન્તસૂરિઃ પુણ્ડરીકાક્ષયજ્વનઃ ।
પૌત્રો યસ્તનયસ્તોતારમ્બાયાસ્તસ્ય મઙ્ગલમ્ ॥ ૫॥

વઙ્કટેશાવતારોઽયં તદ્ઘણ્ટાંશોઽથવા ભવેત્ ।
યતીન્દ્રાંશોઽથવેત્યેવં વિતર્ક્યાયાસ્તુ મઙ્ગલમ્ ॥ ૬॥

શ્રીભાષ્યકારઃ પન્થાનમાત્મના દર્શિતં પુનઃ ।
ઉદ્ધર્તુમાગતો નૂનમિત્યુક્તાયાસ્તુ મઙ્ગલમ્ ॥ ૭॥

યો વાલ્યે વરદાર્યસ્ય પ્રાચાર્યસ્ય પરાં દયામ્ ।
આવાપ્ય વૃદ્ધિં ગમિતસ્તસ્મૈ યોગ્યાય મઙ્ગલમ્ ॥ ૮॥

રામાનુજાચાર્યદાત્રેયાન્માતુલાત્ સકલાઃકલાઃ ।
આવાપ્ય વિંશત્યબ્દે યસ્તસ્મૈ પ્રાજ્ઞાય મઙ્ગલમ્ ॥ ૯॥

શ્રુતપ્રકાશિકા ભૂમૌ યેનાદૌ પરિરક્ષિતા ।
પ્રવર્તિતા ચ પાત્રેષુ તસ્મૈ શ્રેષ્ઠાય મઙ્ગલમ્ ॥ ૧૦॥

સાંસ્કૃતિભિર્દ્રામિડીભિઃ બહ્વીભિઃ કૃતિભિર્જનાન્ ।
યઃ સમુજ્જીવયામાસ તસ્મૈ સેવ્યાય મઙ્ગલમ્ ॥ ૧૧॥

યઃ ખ્યાતિતાભપૂજાસુ વિમુખો વૈષ્ણવે જને ।
ક્રયણીયદશાં પ્રાપ્તસ્તસ્મૈ ભવ્યાય મઙ્ગલમ્ ॥ ૧૨॥

યસ્માદેવ મયા સર્વં શાસ્ત્રમગ્રાહિ નાન્યતઃ ।
તસ્મૈ વેઙ્કટનાથાય મમ નાથાય મઙ્ગલમ્ ॥ ૧૩॥

પિત્રે બ્રહ્મોપદેષ્ટ્રે મે ગુરવે દૈવતાય ચ ।
પ્રાપ્યાય પ્રાપકાયાસ્તુ વેઙ્કટેશાય મઙ્ગલમ્ ॥ ૧૪॥

યઃ કૃતં વરદાર્યેણ વેદન્તાચાર્યમઙ્ગલમ્ ।
અશાસ્તેઽનુદિનં સોઽપિ ભવેન્મઙ્ગલભાજનમ્ ॥ ૧૫॥

ભાદ્રપદમાસગતવિષ્ણુવિમલર્ક્ષે
વેઙ્કટમહીધ્રપતિતીર્થદિનભૂતે ।
પ્રાદુરભવજ્જગતિ દૈત્યરિપુઘણ્ટા
હન્ત કવિતાર્કિકમૃગેન્દ્રગુરુમૂર્ત્યા ॥ ૧૬॥

સશઙ્ખચક્રલાઞ્છનઃ સદૂર્ધ્વપુણ્ડ્રમણ્ડિતઃ
સકણ્ઠલગ્નસત્તુલસ્યનર્ઘપદ્મમાલિકઃ ।
સિતાન્તરીયસૂત્તરીયયજ્ઞસૂત્રશોભિતઃ
મમાવિરસ્તુ માનસે ગુરુઃ સ વેઙ્કટેશ્વરઃ ॥ ૧૭॥

અનન્તસૂરિસૂનવેઽભિવન્દ્યમાનવૈભવાત્
દિગન્તવાદિહંસજૈત્રકાલમેઘદેશિકાત્ ।
ઉપાત્તસર્વશાસનાય હન્ત વર્ષવિંશતૌ
પુનઃપુનર્નમસ્ક્રિયાસ્તુ વેઙ્કટેશસૂરયે ॥ ૧૮॥

ગુરૌ વાદિહંસામ્બુદાચાર્યશિષ્યે
જના ભક્તિહીના યતીન્દ્રાપ્રિયાઃ સ્યુઃ ।
યતીન્દ્રાપ્રિયા વિષ્ણુકારુણ્યદૂરાઃ
કુતો મુક્તિવાર્તા હિ તાદૃગ્વિધાનામ્ ॥ ૧૯॥

કવિતાર્કિકકલભવ્રજકબલીકૃતસિંહં
કમલાપતિકરુણારસપરિવર્ધિતબોધમ્ ।
યતિનાયકપદપઙ્કજયુગલીપરતન્ત્રં
ભજ માનસ બુધવેઙ્કટપતિદેશિકમનિશમ્ ॥ ૨૦॥

વેદે સઞ્જાતખેદે મુનિજનવચને પ્રાપ્તનિત્યાવમાને

સઙ્કીર્ણે સર્વવર્ણે સતિ તદનુગુણે નિષ્પ્રમાણે પુરાણે ।
મયાવાદે સમોદે કલિકલુષવશાચ્છૂન્યવાદેઽવિવાદે
ધર્મત્રાણાય યોઽભૂત્ સ જયતિ ભગવાન્વિષ્ણુઘણ્ટાવતારઃ ॥ ૨૧॥

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

ઇતિ શ્રીવેદાન્તદેશિકમઙ્ગલાનુશાસનં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*shrIvedAntadeshikamangalAnushAsanam*
pdf was typeset on May 13, 2018

Please send corrections to *sanskrit@cheerful.com*